अन्त्यं मध्यं परार्द्धञ्च दशवृद्ध्या यथाक्रमम् ॥"

इति भरतधृतब्रह्माण्डपुराणवचनम् ॥ * ॥

धर्म्मशास्त्रप्रयोजकमुनिविशेषः। यथा,—

"मन्वत्रिविष्णुहारीतयाज्ञवल्क्योशनोऽङ्गिराः।
यमापस्तम्बसम्वर्त्ताः कात्यायनबृहस्पती॥
पराशरव्यासशङ्खलिखिता दक्षगोतमौ।
शातातपो वशिष्ठश्च धर्म्मशास्त्रप्रयोजकाः॥"

इति याज्ञवल्क्यवचनम् ॥

शङ्खकं, क्ली, वलयः। इति मेदिनी ॥

शङ्खकः, पुं क्ली, (शङ्ख+स्वार्थे कन्।) कम्बुः। शिरोरोगे, पुं। इति मेदिनी ॥ तस्य लक्षणादि यथा,—

शङ्खकमाह।

"पित्तरक्तानिला दुष्टाः शङ्खदेशे विमूर्च्छिताः।
तीव्ररुग्दाहरागं हि शोथं कुर्व्वन्ति दारुणम्॥
स शिरो विषवद्वेगान्निरुध्याशु गलं तथा।
त्रिरात्राज्जीवितं हन्ति शङ्खको नाम नामतः।
त्र्यहाज्जीवति भैषज्यं प्रत्याख्येयस्य कारयेत्॥"

पित्तरक्तानिलाः अत्र कफोऽपि योज्यः। कृतानुताप: कफपित्तरक्तैरिति सुश्रुतवचनात्। विमूर्च्छिताः प्रवृद्धाः। त्रिरात्रात् त्रिरात्रमध्ये मारयति। इति भावप्रकाशः ॥ अस्य चिकित्सा शिरोरोगशब्दे द्रष्टव्या ॥ (ललाटास्थि। यथा, याज्ञवल्क्ये। ३। ८०।

"द्वौ शङ्खकौ कपालानि चत्वारि शिरसस्तथा।
उरः सप्तदशास्थीनि पुरुषस्यास्थिसंग्रहः॥")

शङ्खकारः, पुं, (शङ्खं करोतीति। शङ्ख+कृ+अण्।) वर्णसङ्करजातिविशेषः। शाँखारि इति भाषा। स तु शूद्रागर्भे विश्वकर्म्मौरसाज्जातः। इति ब्रह्मवैवर्त्तपुराणम् ॥ तत्पर्य्यायः। शाङ्खिकः २ काम्बजकः ३। इति शब्दरत्नावली ॥ शाम्बविकः ४। इति जटाधरः ॥

शङ्खचरी, स्त्री, (शङ्खे ललाटास्थ्नि चरतीति। चर+टः। स्त्रियां ङीप्।) ललाटिका। इति त्रिकाण्डशेषः ॥

शङ्खचर्च्ची, स्त्री, ललाटिका। इति शब्दरत्नावली ॥

शङ्खचूर्णं, क्ली, (शङ्खस्य चूर्णम्।) शङ्खजातचूर्णम्। शाँखेर चूण इति भाषा। अस्य गुणाः।

"शङ्खचूर्णं कटु क्षारसुष्णं क्रिमिहरं परम्॥"

इति राजवल्लभः ॥

शङ्खजः, पुं, (शङ्खाज्जायते इति। जन+डः।) कपोतडिम्बवद्बृहन्मुक्ता। इति केचित् ॥ शङ्खजातवस्तुनि, त्रि ॥

शङ्खद्रावकः, पुं (शङ्खं द्रावयतीति। द्रु+णिच्+ण्वुल्।) औषधविशेषः। यथा,—

"अर्कस्नुही तथा चिञ्चा तिलारग्वधचित्रकम्।
अपामार्गभस्मसमं वस्त्रपूतं जलं हरेत्॥
मृदग्निना पचेत्तत्तु यावल्लवणतां गतम्।
लवणेन समौ ग्राह्यौ द्वौ क्षारौ टङ्कणं तथा।
समुद्रफेनगोदन्ताकाशीशं चोरका तथा।
द्विगुणं पञ्चलवणं मातुलुङ्गरसेन च॥
काचकूप्यान्तु सप्ताहं वासयेद्यन्त्रयोगतः।
शङ्खचूर्णपलं दत्त्वा वारुणीयन्त्रमुद्धरेत्॥
सर्व्वधातून् हरेच्छीघ्रं वराटीशङ्खकादिकान्।
उदरादिसर्व्वरोगाणां सद्यो हि नाशकः परः॥"

इति शङ्खद्रावकः ॥ * ॥

अपि च।

"योगिनीभैरवाभ्याञ्च बलिमादौ प्रदापयेत्।
पश्चादुद्यन्तञ्च कर्त्तव्यमेवाह परमेश्वरी॥
रसः शङ्खद्रवो नाम शम्भुदेवेन भाषितः।
गुह्याद्गुह्यतमं गुह्यमिदानीं कथ्यते मया॥
शङ्खचूर्णं यवक्षारं सर्ज्जिकाक्षारटङ्कणम्।
समञ्च पञ्चलवणं स्फटिकारी नृशादरः॥
काचकूप्यां त... क्षिप्त्वा वारुणीयन्त्रमुद्धरेत्।
यामार्द्धं द्रावयत्येष शङ्खशुक्तिवराटकान्॥
अर्शांसि नाश... षट् च न्यूनदक्लाश्मरीं तथा।
उदराष्टविधं हन्ति गुल्मप्लीहोदराणि च॥
अजीर्णं नाशयेच्छीघ्रं ग्रहणीञ्च विसूचिकाम्।
भुक्तशेषे च भोक्तव्यो माषमात्रो रसोत्तमः॥
याममात्राद्भवेद्भस्म पुनर्भोजनमिच्छति।
प्रत्यहं भोजनान्ते च संसेव्योऽयं रसोत्तमः॥
न रुजायां भयं क्वापि सत्यं सत्यं वदाम्यहम्।
न देयं यस्य कस्यापि सदा गोप्यञ्च कारयेत्।
रसः शङ्खद्रवो नाम वैद्यानामुपकारकः॥"

शङ्खद्रावको रसः। इति भैषज्यरत्नावली ॥

शङ्खद्रावी, [न्] पुं, (शङ्खं द्रावयतीति। द्रु+णिच्+णिनिः।) अम्लवेतसः। इति राजनिर्घण्टः ॥

शङ्खधरा, स्त्री, (धरतीति। धृ+अच् टाप्। शङ्खस्य धरा।) हिलमोचिका। इति रत्नमाला ॥

शङ्खध्मः, पुं, (शङ्खं धमतीति। ध्मा+कः।) शङ्खवादकः। तत्पर्य्यायः। शाङ्खिकः २। इति जटाधरः ॥ (यथा, वाजसनेयसंहितायाम्।३०।१६।

"क्रोशाय तूणवध्ममवरस्पराय शङ्खध्मम्॥"

शङ्खध्माः, पुं, (शङ्खं धमतीति। ध्मा+क्विप्।) शङ्खवादकः। इति मुग्धबोधव्याकरणम् ॥

शङ्खनखः, पुं, क्षुद्रशङ्खः। जोङ्गड़ा इति भाषा। इत्यमरभरतौ ॥ (यथा, महाभारते।१३।५०।२०।

"नखैः शङ्खनखैर्गात्रैः क्रोडैश्चित्रैरिवार्पितम्॥")

नखीनामगन्धद्रव्यम्। इति शब्दरत्नावली ॥ हट्टविलासिनी। यथा,—

"महाकुम्भी शङ्खनखः शङ्खाख्यो गन्धसारकः।"

इति रत्नमाला ॥

शङ्खनखा, स्त्री, शङ्खनखी। यथा,—

"द्विधा शङ्खनखाख्यान्या शुक्त्याख्या बदरी-
च्छदः।"

इति रत्नमाला ॥

शङ्खपुष्पी, स्त्री, (शङ्खवत् पुष्पं यस्याः। ङीप्।) वृक्षविशेषः। शङ्खाहुली इति डाकुनी इति च भाषा। तत्पर्य्यायः। सुपुष्पी २ शङ्खाह्वा ३ कम्बुमालिनी ४ पीतपुष्पी ५ कम्बुपुष्पी ६ मेध्या ७ मलविनाशिनी ८ किरिटी ९ शङ्खकुसुमा १० भूलग्ना ११ शङ्खमालिनी १२। अस्या गुणाः। हिमत्वम्: तिक्तत्वम्। मेधास्वरकारित्वम्। ग्रहभूतादिदोषनाशित्वम्। वशीकरणसिद्धिदातृत्वञ्च। इति राजनिर्घण्टः ॥ अपि च।

"शङ्खपुष्पी तु तीक्ष्णोष्णा मेध्या क्रिमिविषा-
पहा॥"

इति राजवल्लभः ॥

अन्यच्च।

"शङ्खपुष्पी तु शङ्खाह्वा मङ्गल्या कुसुमापि च।
शङ्खपुष्पी सरा मेध्या वृष्या मानसरोगनुत्॥
रसायनी कषायोष्णा स्मृतिकान्तिबलाग्निदा।
दोषापस्मारभूतालक्ष्मीकुष्ठक्रिमिविषप्रणुत्॥"

इति भावप्रकाशः ॥

शङ्खप्रस्थः, पुं, चन्द्रस्य चिह्नम्। यथा,—

"लिङ्गं लक्ष्मञ्च चिह्नञ्च शङ्खप्रस्थो विधोरथ।"

इति शब्दमाला ॥

शङ्खभृत्, पुं, (शङ्खं बिभर्त्तीति। भृ+क्विप्।) विष्णुः। इति हेमचन्द्रः ॥ (यथा, महाभारते। १३। १४९। १२०।

"शङ्खभृन्नन्दकी चक्री शार्ङ्गधन्वा गदाधरः॥")

शङ्खमुखः, पुं, (शङ्खवत् मुखं यस्य।) कुम्भीरः। इति हेमचन्द्रः ॥ (नागविशेषः। यथा, महाभारते। १। ३५। ११।

"नागः शङ्खमुखश्चैव तथा कुष्माण्डकः परः॥")

शङ्खमूलं, क्ली, (शङ्खवत् शुक्लं क्रमसूक्ष्मं वा मूलं यस्य।) मूलकम्। इति राजनिर्घण्टः ॥

शङ्खाख्यः, पुं, (शङ्ख इति आख्या यस्य।) हट्टविलासिनी। इति रत्नमाला ॥

शङ्खाह्वा, स्त्री, (शङ्ख इति आह्वा नाम यस्याः।) शङ्खपुष्पी। इति राजनिर्घण्टः ॥

शङ्खिका, स्त्री, (शङ्खवत् पुष्पमस्त्यस्याः। शङ्ख+ठन्।) वृक्षविशेषः। चोरहुली इति भाषा। यथा। शङ्खिन्यां शङ्खिका चोरा। इति शब्दचन्द्रिका ॥

शङ्खिनी, स्त्री, (शङ्खवत् पुष्पमस्त्यस्याः। शङ्ख+इनिः।) चोरपुष्पी। इत्यमरः ॥ श्वेतपुन्नागः। इति विश्वः ॥ श्वेतवृन्दा। इति मेदिनी ॥ श्वेतबुह्ना। इति शब्दरत्नावली ॥ बुद्धशक्तिभेदः। इति त्रिकाण्डशेषः ॥ यवतिक्ता। इति राजनिर्घण्टः ॥ चतुर्व्विधस्त्रीमध्ये स्त्रीविशेषः। तल्लक्षणं यथा,—

"दीर्घा सुदीर्घनयना वरसुन्दरी या
कामोपभोगरसिका गुणशीलयुक्ता।
रेखात्रयेण च विभूषितकण्ठदेशा
सम्भोगकेलिरसिका किल शङ्खिनी सा॥
शशकं पद्मिनी तुष्टा चित्रिणी रमते मृगम्।
वृषभं शङ्खिनी तुष्टा हस्तिनी रमते हयम्॥
पद्मिनी पद्मगन्धा च मीनगन्धा च चित्रिणी।
शङ्खिनी क्षारगन्धा स्यात् मदगन्धा च
हस्तिनी॥"

इति रसमञ्जरी ॥